# Shri Ganesha Stuti Brahmanikrita

# બ્રહ્માણિકૃતા શ્રીગણેશસ્તુતિઃ

## Document Information

Text title : Shri Ganesha Stuti Brahmanikrita

File name : gaNeshastutiHbrahmANikRRitA.itx

Category : ganesha, mudgalapurANa, stuti

Location : doc_ganesha

Proofread by : Yash Khasbage, Preeti Bhandare

Description/comments : mudgalapurANaM saptamaH khaNDaH | adhyAyaH 10 | 7.10 19-29||

Latest update : June 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 4, 2024

*sanskritdocuments.org*

# બ્રહ્માણિકૃતા શ્રીગણેશસ્તુતિઃ

॥ શ્રીગણેશાય નમઃ ॥
બ્રહ્માણ્યૂચુઃ ।
વિઘ્નેશાય નમસ્તુભ્યં ગરુડધ્વજિને નમઃ ।
ચતુર્ભુજાય સર્વેષાં પતયે વૈ નમો નમઃ ॥ ૧૯॥
ચક્રપાણે રમેશાય પરાત્પરતરાય ચ ।
હેરમ્બાય વિકુણ્ઠસ્ય નાથાય તે નમો નમઃ ॥ ૨૦॥
સ્વાનન્દવાસિને તુભ્યં ગજાનનાય ઢુણ્ઢયે ।
અપારાય મહેશાનસુતાય તુ નમો નમઃ ॥ ૨૧॥
કાશ્યપાય ચ શેષસ્ય પુત્રાય ભક્તવત્સલ ।
દૈત્યદાનવનાશાય શાર્ઙ્ગિણે તે નમો નમઃ ॥ ૨૨॥
ગદાધરાય દેવાય વાસુદેવાય દેવપ ।
ધર્મસ્થાપનકારાય બ્રહ્મણે તે નમો નમઃ ॥ ૨૩॥
સદસન્મયરૂપાય ચાનન્દપદધારિણે ।
સમાય સર્વભાવેષુ શાશ્વતાય નમો નમઃ ॥ ૨૪॥
નમો વાગતિરૂપાય દેહદેહિપ્રચારિણે ।
બોધાય ચ વિદેહાય વિષ્ણવે તે નમો નમઃ ॥ ૨૫॥
કિં સ્તુમસ્ત્વાં પરેશાન યત્ર વેદા વિકુણ્ઠિતાઃ ।
યોગિનસ્તુ મહાભાગ પ્રસન્નો ભવ તે નમઃ ॥ ૨૬॥
બ્રહ્માણિ એવં સ્તુત્વા ચ પ્રણેમુસ્તં જનાર્દનમ્ ।
તાન્યુત્થાપ્ય જગાદ સ્વયં વિષ્ણુર્હર્ષસંયુતઃ ॥ ૨૭॥
(ફલશ્રુતિઃ)
વિષ્ણુરુવાચ ।
ભવત્કૃતં મદીયં ચ સ્તોત્રં ભુક્તિપ્રદં ભવેત્ ।
મુક્તિદં શ્ૃણ્વતે બ્રહ્મદાયકં પઠતે સદા ॥ ૨૮॥
બ્રહ્માણિ યદ્યદિચ્છેત તત્તદ્ વૃણુત સત્વરમ્ ।

દાસ્યામિ તપસા તુષ્ટઃ સ્તોત્રેણાનેન નિશ્ચિતમ્ ॥ ૨૯॥

ઇતિ બ્રહ્માણિકૃતા શ્રીગણેશસ્તુતિઃ સમ્પૂર્ણા ॥

- ॥ મુદ્ગલપુરાણં સપ્તમઃ ખણ્ડઃ । અધ્યાયઃ ૧૦ । ૭.૧૦ ૧૯-૨૯॥

- .. mudgalapurANaM saptamaH khaNDaH . adhyAyaH 10 . 7.10 19-29..

Proofread by Yash Khasbage, Preeti Bhandare

*Shri Ganesha Stuti Brahmanikrita*

pdf was typeset on June 4, 2024

Please send corrections to *sanskrit@cheerful.com*